කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

**බාහිර විභාග අංශය**

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි ප්‍රථම පරීක්ෂණය (බාහිර) - 2010
2011 අප්‍රේල් / මැයි

මානවශාස්ත්‍ර පීඨය

සංස්කෘත - SANS. E1025

**සම්භාව්‍ය සංස්කෘත සාහිත්‍ය ප්‍රවේශය, සංස්කෘත ව්‍යාකරණ හා අනිර්දිෂ්ට පරිවර්තනය**

**පළමු ප්‍රශ්නය ඇතුළුව ප්‍රශ්න පහකට (05) පිළිතුරු සපයන්න.**

ප්‍රශ්න සංඛ්‍යාව : 06 යි | කාලය : පැය 03 යි

---

01. පහත සඳහන් අනිර්දිෂ්ට ගද්‍ය හා පද්‍ය පාඨ සිංහලට පරිවර්තනය කරන්න.

'कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म । तस्य च गर्दभ एकोऽस्ति । सोऽपि घासाभावादतिदुर्बलतां गतः । अथ तेन रजकेनाटव्यां परिभ्रमता मृतव्याघ्रो दृष्टः । चिन्तितं च—'अहो ! शोभनमापतितम् । अनेन व्याघ्रचर्मणा प्रतिच्छाद्य रासभं रात्रौ यवक्षेत्रेषूत्स्रक्ष्यामि । येन व्याघ्रं मत्वा समीपवर्तिनः क्षेत्रपाला एनं न निष्कासयिष्यन्ति । तथानुष्ठिते रासभो यथेच्छया यवभक्षणं करोति । प्रत्यूषे भूयोऽपि रजकः स्वाश्रयं नयति । एवं गच्छता कालेन स रासभः पीवरतनुर्जातः । कृच्छ्राद्बन्धनस्थानमपि नीयते । अथान्यस्मिन्नहनि स मदोद्धतो दूराद्रासभीशब्दमशृणोत् । तच्छ्रवणमात्रेणैव स्वयं शब्दायितुमारब्धः । अथ ते क्षेत्रपाला "रासभोऽयं व्याघ्रचर्मप्रतिच्छन्नः" इति ज्ञात्वा लगुडशरपाषाणप्रहारैस्तं व्यापादितवन्तः ।

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥ ११५ ॥
स्थानं नास्ति क्षणो नास्ति, नास्ति प्रार्थयिता नरः ।
तेन नारद ! नारीणां सतीत्वमुपजायते ॥ ११६ ॥
न स्त्रीणामप्रियः कश्चित्, प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥ ११७ ॥

घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ॥ ११८ ॥
मात्रा स्वस्रा दुहित्रा वा नोऽविविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ ११९ ॥
न लज्जा न विनीतत्वं न दाक्षिण्यं न भीरुता ।
प्रार्थनाभाव एवैकं सतीत्वे कारणं स्त्रियः ॥ १२० ॥
पिता रक्षति कौमारे, भर्ता रक्षति यौवने ।
पुत्रश्च स्थविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥ १२१ ॥

02. මේඝදූතයට හෝ අභිඥාන ශාකුන්තලයට කෙටි ප්‍රස්තාවනාවක් ලියන්න.

03. ආඛ්‍යාත හා තද්ධිත ප්‍රත්‍යයයන් හඳුන්වා දී ඒවායේ පද සාධනය නිදසුන් මගින් පෙන්වා දෙන්න.

04. පරෝක්ෂ ලිට් ප්‍රයෝගයේ අර්ථය හා සාධනවිධි නිදසුන් ඇසුරින් පෙන්වා දෙන්න.

05. කෘත්‍ය කෘදන්ත පිළිබඳ විස්තර කරන්න.

06. පහත සඳහන් මාතෘකාවලට කෙටි සටහන් සපයන්න.

i. තත් පුරුෂ සමාසය
ii. භූතකාරය
iii. ''උපසර්ග ගතිස්ත්‍රිධා''

*******************************